# प्रत्यक्षशारीरम्

महामहोपाध्याय श्रीगणनाथ सेन-शर्म्म-सरस्वती

शारीरग्रन्थः

तस्य चायम्

नाडीखण्डेन्द्रियखण्डवर्णनीयो नाम

प्रथमो भागः

राष्ट्रियसंस्कृतसंस्थानम्

( मानितविश्वविद्यालयः )

नवदेहली

# प्रत्यक्षशारीरम्


वैद्यावतंस-विद्यानिधि सरस्वती-कविराजोपाधिक

महामहोपाध्याय श्रीगणनाथ सेन-शर्म्म-सरस्वती, एम्-ए.
एल्-एम्-एस्,

इत्यनेन कृतः


प्रत्यक्षदृष्ट-नरदेहतत्त्व-वर्णनपरः

## शारीरग्रन्थः

तस्य चायम्

अस्थिसन्धिस्नायुवर्णनीयो नाम

## प्रथमो भागः

( द्वितीयावृत्तिः )


राष्ट्रियसंस्कृतसंस्थानम्

( मानितविश्वविद्यालयः )

नवदेहली

अर्जुन सिंह
ARJUN SINGH

मानव संसाधन विकास मंत्री
भारत
नई दिल्ली-११० ००१
MINISTER OF
HUMAN RESOURCE DEVELOPMENT
INDIA
NEW DELHI-110 001

# सन्देश

संस्कृत साहित्य में अनेक ग्रन्थरत्न विद्यमान हैं जिनका पठन-पाठन एवं अनुसंधान इस राष्ट्र में सहस्रों वर्षों से चला आ रहा है। वेद, शास्त्र, स्मृति एवं पुराण जैसे विशाल ग्रन्थ संस्कृत वाङ्मय का अंग हैं। यह वाङ्मय समय-समय पर प्रतिष्ठित विद्वानों द्वारा परिश्रम एवं आर्थिक व्यय से अंशत: प्रकाशित भी हुआ है। किन्तु समय के साथ इन ग्रन्थों की मुद्रित पुस्तकें छात्रों, विद्वानों एवं सामान्यजनों को दुर्लभ होने लगी हैं। अत: इन दुर्लभ सुसम्पादित ग्रन्थों का पुनर्मुद्रण कर न्यूनतम मूल्य पर उपलब्ध कराने की योजना मानव संसाधन विकास मंत्रालय एवं उसके अंगभूत राष्ट्रिय-संस्कृत-संस्थान के द्वारा कार्यान्वित की गयी है।

मैं आशा करता हूँ कि इस दूरगामी उपक्रम से संस्कृत के विद्वान्, छात्र एवं संस्कृतप्रेमी सामान्यजन लाभान्वित होंगे तथा संस्कृत के ज्ञान, वैभव का विस्तार होगा। साथ ही मैं यह भी कामना करता हूँ कि राष्ट्रिय-संस्कृत-संस्थान इस योजना में अन्य महत्त्वपूर्ण ग्रन्थों को भी प्रकाशित कर संस्कृत की श्रीवृद्धि करेगा।

( अर्जुन सिंह )

# चित्र-सूची ।

पुरश्चित्रम्—( ग्रन्थारम्भे )


| | | | |
|---|---|---|---|
| कङ्कालचित्रम् ( प्रथमम् ) | १४ | पश्चात्कपालम् ( पुरस्तलम् ) | ६० |
| कङ्कालचित्रम् ( द्वितीयम् ) | १६ | पश्चिमकपालम् ( पृष्ठतलम् ) | ६२ |
| पादास्थि ... | १८ | पार्श्वकपालम् ( आभ्यन्तरतलम् ) | ६४ |
| जङ्घास्थि ... | २२ | पुरःकपालम् ( बहिस्तलम् ) | ६६ |
| जान्वस्थि ... | २४ | पुरःकपालम् ( अन्तस्तलम् ) | ६७ |
| ऊर्वस्थि ... | २५ | शङ्खास्थि ( बहिस्तलम् ) | ६८ |
| पाणिपुरोभागः ... | २७ | शङ्खास्थि ( अन्तस्तलम् ) | ७० |
| प्रकोष्ठास्थिनी ... | ३१ | जतूकास्थि ( ऊर्ध्वतलम् ) | ७३ |
| प्रगण्डास्थि ... | ३४ | झर्झरास्थि ... | ७६ |
| पृष्ठवंशः ... | ३७ | नासास्थिनी ... | ७७ |
| पृष्ठकशेरुका ... | ३८ | ऊर्ध्वहन्वस्थि ( बहिस्तलम् ) | ७८ |
| ग्रीवाकशेरुका ... | ३९ | ऊर्ध्वहन्वस्थि ( अन्तस्तलम् ) | ७९ |
| चूड़ावलया ... | ३९ | अश्रुपीठास्थि ... | ८१ |
| दन्तचूड़ा ... | ४० | गण्डास्थि ( बहिस्तलम् ) | ८२ |
| महाकण्टकिनी ... | ४१ | गण्डास्थि ( अन्तस्तलम् ) | ८२ |
| पृष्ठकशेरुका ( पार्श्वतो दृष्टा ) | ४१ | ताल्वस्थि ... | ८४ |
| विशिष्टाः पृष्ठकशेरुकाः ... | ४२ | सीरिकास्थि ... | ८६ |
| त्रिकास्थि ... | ४३ | अधोहन्वस्थि ... | ८८ |
| अनुत्रिकास्थि ... | ४४ | कण्ठिकास्थि ... | ९१ |
| श्रोणिफलकम् ... | ४६ | करोटिपटलम् ... | ९३ |
| अंसफलकम् ... | ५० | करोटिपीठम् ... | ९६ |
| अक्षकास्थि ... | ५२ | करोटितलम् ... | १०२ |
| उरःफलकमुपपर्शुकाश्च ... | ५४ | करोटिपक्षः ... | १०५ |
| पर्शुकाः ( सामान्यतः ) ... | ५६ | मुखमण्डलम् ... | १०७ |
| विशिष्टपर्शुकाः ... | ५७ | नासागुहा ... | ११२ |
| करोटिः ... | ५९ | | |

ताङ्गुष्ठात्, अङ्गुष्ठे तु पश्चिमनलकाग्रेण सन्धिः मध्यमनलकाभावात् । मध्यश्रेणीस्थानि चत्वारि तूभयतः[1] सन्धिमन्ति । पश्चिमश्रेणीस्थानि पञ्च तान्यप्येवम्[2] ।

**कराङ्गुलीमूलशलाकाः**[3] —कराङ्गुलीनां मूलतः प्रतिकरं पञ्च शलाकास्ताः कराङ्गुलीमूलशलाका नाम, ताभिरालम्ब्यते करतलम् । मूलतश्च तानि यथायथं कूर्चास्थिभिः सन्धीयन्ते अग्रतश्च पश्चिमाङ्गुलीनलकैः । अतएव कूर्चास्थ्नां "शलाकाधिष्ठान"-संज्ञा । तत्रेमे विशेषाः ।

**प्रथमा—अङ्गुष्ठमूलशलाका** नाम, सा मूलशलाकासु ह्रस्वतमा मूलतश्चैकेन सन्धिलक्ष्मणोपलक्षिता पर्य्याणकाख्येन कूर्चास्थ्ना सन्ध्यर्थम् ।

**द्वितीया तर्ज्जनीमूलशलाका** नाम, सा मूलतश्चतुर्भिः सन्धिलक्ष्मभिरुपलक्षिता पर्य्याणक-कूटक-मध्यकूटाख्यैस्त्रिभिः कूर्चास्थिभिः मध्यमामूलशलाका-मूलपार्श्वेन च सन्धानाय ।

**तृतीया—मध्यमामूलशलाका** नाम, सा त्रिभिः सन्धिलक्ष्मभिरङ्किता मूलतः, मध्ये मध्यकूटाख्येन कूर्चास्थ्ना, उभयतश्च तर्ज्जन्यनामिकयोः मूलशलाकामूलपार्श्वाभ्यां सन्ध्यर्थम् ।

**चतुर्थी—अनामिकामूलशलाका** नाम, सा सन्धिलक्ष्मचतुष्टयेनाङ्किता मूलतः । तत्र मध्यस्थे सन्धिलक्ष्मणी मध्यकूट-फणधर-संज्ञाभ्यां कूर्चास्थिभ्यां सन्धानाय । पार्श्वगे तु सन्धिलक्ष्मणी तर्ज्जनीकनिष्ठयोः मूलशलाकामूलपार्श्वाभ्यां सन्धिसूचनाय ।

**पञ्चमी—कनिष्ठामूलशलाका** नाम, तस्या मूलतो द्वे सन्धिलक्ष्मणी, तत्रैकं फणधरेण, अपरमनामिकामूलशलाकामूलपार्श्वेन सन्ध्यर्थम् ।

ता एताः कर-मूलशलाका व्याख्याताः । तासां नानास्थिभिः सन्धिप्रकारस्मरणार्थं स्नोकास्तु पादास्थिवदेव, केवलं तत्रैव[4] "पादमूलशलाका" इत्यत्र "कर-मूलशलाका" इति पाठपरिवृत्तिः कार्य्या ।

---

१ पुरोऽङ्गुलीनलकैः पश्चात् पश्चिमनलकैः । २ उभयतः सन्धिमन्तीत्यर्थः । सन्धिश्च कनिष्ठाद्यङ्गुलीचतुष्टये पुरो मध्यमनलकैरङ्गुष्ठे पुरोऽग्रिमनलकेन, पश्चात्तु पञ्चस्वपि अङ्गुलीमूलशलाकाग्रैः । ३ कराङ्गुलीमूलशलाकाः = Metacarpals. ४ द्रष्टव्यं १९ पृष्ठे ।



**अथ करकूर्चास्थीनि**[1]—करकूर्चास्थीनि नाम मणिबन्धनिर्मापकानि तनुह्रस्वविषमाणि प्रतिकरमष्टौ । तान्येव कर-"शलाकाधिष्ठानानि" नाम । तानि श्रेणीद्वयविन्यस्तानि । तत्रोर्द्ध्वश्रेण्यां चत्वारि, क्रमेण नौनिभार्द्धचन्द्रोपलकवर्त्तुलकाख्यानि । अधःश्रेण्यां चत्वारि, पर्य्याणक-कूटक-मध्यकूट-फणधर संज्ञानि । तत्रोर्द्ध्वश्रेणीस्थानां चतुर्णां मध्ये प्रथमानि त्रीणि मणिबन्धसन्धौ प्रविष्टानि । वर्त्तुलकाख्यन्तु वहिः सन्धितः, तत् काण्डरान्तरीयं चणकास्थीति केचित् । तत्र—

**नौनिभं**[2] नाम—(८म चित्रे १) नावाकारं कूर्चास्थि, तुल्यसंज्ञेन पादकूर्चास्थ्ना सदृशम् । तद् वहिःस्थेन क्षुद्रार्वुदेनोपलक्षितं, ऊर्द्ध्वं सन्धिलक्ष्मयुतञ्च प्रकोष्ठास्थ्नः अधःप्रान्तेन सन्ध्यर्थम् । अस्य पार्श्वतः खातोदरं सन्धिलक्ष्म अर्द्धचन्द्रमध्यकूटकयोः पार्श्वाभ्यां सन्धानाय । निम्नसीम्नि च सन्धिलक्ष्म पर्य्याणककूटकयोरूर्द्ध्वप्रान्ताभ्यां सन्ध्यर्थम् । पश्चिमतश्च नौनिभस्य उच्चावचा रेखा मणिबन्धस्नायुसूत्राणां संयोगाय ।

**अर्द्धचन्द्रं**[3] नाम—(८म चित्रे २) तादृशाकारेण सन्धिलक्ष्मणा वहिरुपलक्षितं कूर्चास्थि, तत्रार्द्धचन्द्रलक्ष्मणा नौनिभेन सह सन्धिः । अपरञ्चास्य शिरसि सन्धिलक्ष्म वहिःप्रकोष्ठास्थिप्रान्तेन सन्ध्यर्थम्, इतराणि तु सन्धिलक्ष्माणि उपलक-फणधर-मध्यकूट-संज्ञैः कूर्चास्थिभिः सन्धिसूचकानि ।

**उपलकं**[4] नाम—तृतीयं कूर्चास्थि न्युब्जपृष्ठं सन्धिलक्ष्माङ्कितञ्चोपरिष्टात् मणिबन्ध-सन्धि-मध्यवर्त्तिना त्रिकोणतरुणास्थ्ना सन्धानाय । त्रीण्यत्र चापराणि सन्धिलक्ष्माणि क्रमेण अर्द्धचन्द्र-फणधर-वर्त्तुलकाख्यैः कूर्चास्थिभिः सन्ध्यर्थम् ।

**वर्त्तुलकं**[5] नाम प्रायेण वर्त्तुलाकारं क्षुद्रतमं कूर्चास्थि । सन्धिलक्ष्म चात्रैकमुपलकेन सन्धिव्यञ्जनाय ।

---

१ Carpal Bones. २ नौनिभं = Scaphoid. ३ अर्द्धचन्द्रम् = Semliunar. ४ उपलकं = Cuneiform. ५ वर्त्तुलकं – Pisiform.

# प्रत्यक्षशारीरम्

महामहोपाध्याय श्रीगणनाथ सेन-शर्म्म-सरस्वती

## शारीरग्रन्थः

तस्य चायम्

नाडीस्थानेन्द्रियस्थानवर्णनीयो नाम

द्वितीयो भागः

राष्ट्रियसंस्कृतसंस्थानम्
( मानितविश्वविद्यालयः )
नवदेहली

**अधिमन्या**[१] नाम सिरा भूम्ना शिरोग्रीवबाह्यानां सिराणां विशेषतश्च मुखमण्डलीयगम्भीरसिराणां रक्तसंग्राहिणी। सा ग्रीवाया एकैकपार्श्वे मन्याख्यां पेशीमधिरूढा कर्णमूलाद् अक्षकास्थिमध्यविन्दुं यावत् तिर्य्यगवस्थिता। सेयं पुरःपश्चिमग्रीविकाभ्यां सिराभ्याम् अंसग्रीवीयतिरश्चीनसिराभ्यां च सम्मिलिता ग्रीवामूले अक्षाधरां सिरां प्रविशति।

**पश्चिमग्रीविका**[२] नाम सिरा करोटिपश्चिमस्थाभिरुत्तानसिराभिः आपूरिता पश्चिमकपालमूलादारभ्य तिर्य्यग् ग्रीवापार्श्वे अधोमुखं गत्वा अधिमन्यां सिरां प्रविष्टा।

**मस्तिष्कमातृका**[३] नाम सिरा तत्संज्ञाया धमन्याः सहचरी भूयिष्ठस्य मस्तिष्कमूलस्थरक्तस्य काशेरुकसिरारक्तस्य च संग्राहिणी। सा ग्रीवाकशेरुकाणां बाहुप्रवर्द्धनस्थेन रन्ध्रपथेन अधोमुखं गत्वा गलमूलिकां नाम सिरां प्रविशति।

ग्रीवाकशेरुकापर्यन्तेष्ववस्थिताः सिरास्तु मध्यकायसिरावर्णने वर्णनीयाः।

### अथ शिरोऽभ्यन्तरीयाः सिराः।

ताश्च त्रिविधाः—कपाल-पत्रान्तरिकाः, मस्तिष्कीयाः, सिरासरितश्चेति। तत्र—

(क) कपालपत्रान्तरिका[४] नाम (११६ चित्रम्) कपालास्थिनिर्म्मापकपत्रकद्वयान्तराले प्रसृताः सिराः स्थूलकुटिलाः। ताश्च मस्तिष्कवृतिगाभिः सिराभिः, सिरासरिद्भिः, करोटिबाह्याभिश्च सिराभिः सम्बन्धवत्यः सूक्ष्मैरस्थिच्छिद्रगैः सिराजालैः। चतुर्विधाश्च ताः—अग्रिमकपालिकाः, शंखपूर्वाः, शंखपश्चिमाः, पश्चिमकपालिकाश्चेति। तासां परस्परं शाखाप्रतानैः संयोगः, पुरः-पार्श्व-पश्चिमकपालानां पत्रकान्तरालेषु।

(ख) मस्तिष्कीयाः सिराः पुनर्द्विविधाः—मस्तिष्कप्रभवाः, अनुमस्तिष्कप्रभवाश्चेति।

१। Ext. Jugular Vein. २। Post. Ext. Jugular Vein. ३। Vertebral Vein. ४। Diploic Veins.



तत्र मस्तिष्कप्रभवाः पुनर्द्वेधा विभज्यन्ते—मस्तिष्कबाह्याः, मस्तिष्काभ्यन्तरीयाश्चेति। तासां बाह्याः प्रायेण मस्तिष्कदलान्तरालस्थासु सीतासु प्रसृताः, ताः स्थानभेदेन उत्तराधरमध्यमासु सिरासु विभक्ताः। मस्तिष्काभ्यन्तरीयास्तु मस्तिष्कस्य आभ्यन्तरभागेभ्यः सम्भूय द्वयोः स्थूलसिरयोः परिणमन्ति। ते च स्थूलसिरे—अन्त्यमूलिका[१], अनुश्रृंखलिका[२] चेति प्रसिद्धे मस्तिष्कवर्णने वर्णनीये। तयोश्च संयोगसमुत्था **महती मस्तिष्कमूलिका**[३] नाम सिरा मस्तिष्कमूले दीर्घिकायोजनीं नाम सिराकुल्यां प्रविष्टा।

अनुमस्तिष्कप्रभवाः सिराः पुनरनुमस्तिष्कमभिव्याप्य स्थिताः उत्तराधरयोः सिराराज्योर्विभज्यन्ते। तत्र उत्तराः सिराराज्यः संघीभूय दीर्घिकायोजनीं सिराकुल्यां प्रविशन्ति, अधरास्तु पार्श्विकाख्ये सिरासरितौ पश्चिमाधरिकाञ्च।

(ग) **सिरासरितः सिराकुल्या**[४] वा नाम (११७।११८ चित्रयोः) क्वचित् स्तरद्वये विभक्तस्य मस्तिष्कच्छदस्यान्तरालस्थाः सिरामार्गाः शिरःसम्पुटस्य अभ्यन्तरगाः। ताः कपालास्थ्नां जतूकाशंखास्थ्नोश्च सिरापरिखासु प्रवहन्ति, आपूर्य्यन्ते च ताः मस्तिष्कीयाभिः सिराभिः प्राधान्येन। स्वयञ्चापूरयन्ति ताः प्रायः पार्श्विकाभ्यां सिरासरिद्भ्याम् अनुमन्याख्ये ग्रीवासिरे।

तासां स्थूलदीर्घाः सिरासरित्संज्ञाः, तनुह्रस्वास्तु सिराकुल्या नाम। साधारणी वा संज्ञा सर्वासां सिरासरिदिति।

ताश्च द्विविधाः। पश्चिमोत्तराः पश्चिमाधराश्चेति। तत्र—

**दीर्घिका**[५] **उत्तरा** नाम सिरासरित् पश्चिमोत्तरासु प्रधाना दीर्घतमा च। सा करोटिपटलान्तमध्यरेखाऽवस्थितां दीर्घिकां नाम सिरापरिखामाश्रित्य प्रवहति। धार्य्यते च सा दात्रिकाख्यकलाया ऊर्द्ध्वधारया स्तरद्वयविभक्तया। स्तरद्वयं च तत् सिरापरिखातटयोः संसक्तम्। सेयं सिरासरित् पुरस्ताद् झर्झरास्थिशिखरकण्टकादारभ्य पश्चिमकपालस्य पुरस्तलस्थं महावर्त्तं यावद् गत्वा तत्रैव पार्श्विकाभ्यां सिरासरिद्भ्यां क्वचिद् दक्षिणपार्श्विकया वा

१। Terminal Cerebral Veins. २। Choroid Veins. ३। Great Cerebral. ४। Venous Sinuses. ५। Superior Sagittal Sinus.

# प्रत्यक्षशारीरम्

महामहोपाध्याय श्रीगणनाथ सेन-शर्म-सरस्वती

## शारीरग्रन्थः

तस्य भागम्

नाडीखण्डेन्द्रियखण्डवर्णनीयो नाम

तृतीयो भागः

राष्ट्रियसंस्कृतसंस्थानम्
( मानितविश्वविद्यालयः )
नवदेहली

अथैतानि चतुर्धा सम्पतन्ति एकैकार्धे मस्तिष्कस्य। यथा—

(१) अग्रिमसूत्रगुच्छानि—आन्तरकूर्चवल्लिकाया अग्रिमांशमाश्रित्य मस्तिष्क-पुरःपिण्डं प्रविशन्ति।

(२) पश्चिमसूत्रगुच्छानि—आज्ञाकन्दस्य दृष्टिपीठाख्यपश्चिमांशात् उत्तराधिपीठिकायाश्च सम्भूय आन्तरकूर्चवल्लिकायाः पश्चिमभागाश्रयेण मस्तिष्क-पश्चिम पिण्डमभिविशन्ति।

(३) अधरसूत्रगुच्छानि—आज्ञाकन्दस्याऽधरान्तरीयभागप्रभवाणि, तान्यधस्तात् शुक्तिकन्दमतिक्रम्य शंखिकपिण्डं प्रच्छन्नपिण्डिकां च प्रविशन्ति।

(४) पार्श्विकसूत्रगुच्छानि—आज्ञाकन्दस्य पार्श्विकभागप्रभवाणि, तानि पार्श्विकपिण्डं प्रविष्टानि, राजिलपिण्डञ्च कैश्चन सूत्रैः।

२। **अग्रिमान्तरीय भागः**[1]—'**संवेदनभूमि**'र्नाम। तत्र हि प्रविशन्ति पार्श्विकभागभवाणि मध्यवल्लिकाभवानि च सूत्राणि, प्रतानाश्च घ्राणनाडी-सूत्राणाम्। तत्प्रभवसूत्राणान्तु राजिलपिण्डान्तः प्रवेशः। तच्चेदं सुख-दुःखादि-संवेदन स्थानमिति तत्त्वविदां सिद्धान्तः।

## अथ ब्रह्मगुहा।

**ब्रह्मगुहा**[2] **ब्रह्मयोनिर्वा**नाम आज्ञाकन्दयोरन्तराले मध्यरेखायां दृश्या गुहा तनुत्रिकोणपरिखाकारा (२२० चित्रम्) सूचितपूर्वा। सा च गुहायाः पुरस्तादूर्द्ध्वं त्रिपथगुहाभ्यां सम्बन्धवती 'गुहान्तरालिक' विवर द्वारेण, पश्चिमतश्च प्राणगुहया 'ब्रह्मद्वारसुरङ्गा' मार्गेण (२१६ चित्रम्)। तदेव क्वचिद् 'ब्रह्महृदय' मिति 'हृदय'-मिति वा व्याहरन्ति प्राज्ञाः। तदन्तश्च दृश्यास्तिस्रः सेतवः—अग्रिमयोजनिका, मध्यपत्रिका, पश्चिमयोजनिका चेति। तत्र—

अग्रिमयोजनिका[3] राजिलवस्तुनोः संयोगविधायिनी शुभ्रवस्तुमयी। तद्-योजकसूत्राणि च शंखिकपिण्डयोः प्रसृतानि इतरपार्श्वीयघ्राणनाडीसूत्रैः।

मध्यपत्रिका[4] (मध्ययोजनिका वा) नाम धूसरवस्तुमयी तन्वी पत्रिका आज्ञा-कन्दयोः संयोगविधायिनी। तस्यां च वेणीबन्धक्रमेण प्रसृतानि मध्यममस्तुलुङ्ग-प्रसूतानि कतिचित् सूत्राणि। सेयं 'ब्रह्मविन्दु'-संज्ञा योगिनामिति केचित्।

---

१। Antero-medial part of Thalamus (Essential organ). २। Third Ventricle. ३। Anterior commissure. ४। Massa Intermedia.



पश्चिमयोजनिका[1] तु—शुभ्रवस्तुमयी ब्रह्मगुहायाः पश्चिमसीमस्था (२१४ चित्रम्)।

एष च ब्रह्मगुहायाः षट्सीमनिर्देशः—

पटलं[2] हि ब्रह्मगुहायास्तत्पिधानिका 'मञ्जरीपत्रिका' नाम। तदुपरिष्टात् छत्रिकायास्त्रिकोणाकृतिरंशः 'छत्रपत्रिका' संज्ञः (२१३।२१४ चित्रयोः)। तौ चोक्तपूर्वौ।

भूमिन्तु तस्या रचयन्ति—मस्तिष्कमृणालकद्वयान्तरालस्था सुषिरपत्रिका (पश्चिमाख्या), चूचुकाख्यं वर्त्तुलद्वयं, पोषणकग्रन्थिः सवृन्तिकः, दृष्टिनाडी-योजनिका चेति विशेषाः। तेषां 'कन्दाधरिकभाग'[3] इति संज्ञा (१९९ चित्रम्)।

पुरस्ताद् ब्रह्मगुहाया दृश्ये छत्रिकास्तम्भिके अग्रिमाख्ये।

पश्चात् पुनः—मूलत्रिकोणं सभित्तिकं, तृतीय दृक्कन्दिका, पश्चिमयोजनिका, ब्रह्मद्वारसुरङ्गामुखं च।

उभयोस्तु पार्श्वयोः आज्ञाकन्दद्वयं, मूलद्वयी च तृतीयदृक्कन्दिकायाः।

अभ्यन्तरं तु ब्रह्मगुहायाः सुमसृणं ब्रह्मवारिपूर्णञ्च। तन्मध्यस्थं चाकाशं 'ब्रह्मविन्दु'-प्रदेशं वा परमशिवस्थानमामनन्ति योगिनः। ब्रह्मवारि तु तदन्तःस्थं त्रिपथगुहान्तरीय-ब्रह्मवारिणा 'गुहान्तरालिक' छिद्राभ्यां, प्राणगुहान्तःस्थब्रह्मवारिणा च ब्रह्मद्वार-सुरङ्गामार्गेण समन्वेति। सुषुम्नाकाण्डान्तरीय 'ब्रह्ममार्ग'स्थं वार्य्यपि तदनुबन्धि। अतएवास्य 'मस्तिष्क सुषुम्नान्तरीयजल'[4]मिति संज्ञा। तच्च यदा रोगवशात् परिमाणतः प्रवृद्धं पूयादिदुष्टं वा ज्वर-मोहादिप्रदं भवति, तदांऽशेन निर्हरन्ति कटि-कशेरुकान्तरालमाविध्य पृष्ठतः सूचीयन्त्रेण शल्यतान्त्रिकाः।

## अथ मूलपिण्डानुबन्धाः।

**अनुबन्धास्तु** मस्तिष्कमूलपिण्डस्योद्दिष्टपूर्वाः। ते शिष्यबुद्धिसौकर्य्याय आज्ञाकन्दव्यतिकरेण उत्तराधरिकभागयोर्विभज्य वर्ण्यन्ते। तत्र कन्दोत्तरिकभागे त्रीणि द्रष्टव्यानि—सभित्तिकं मूलत्रिकोणं, तृतीयदृक्कन्दिका, पश्चिमयोजनिका च। कन्दाधरिकभागे च त्रीणि—चूचुकवर्त्तुलके, पोषणकग्रन्थिः सवृन्तिकः, दृष्टिनाडीयोजनिका चेति। विशेषास्तु यथा—

---

१। Posterior Commissure. २। पटलं छदिः (Roof). ३। Sub-thalamic region. ४। Cerebro-spinal fluid.